shrIstutiH by Swami Vedanta Desika

श्रीस्तुतिः

Document Information

Text title : shrIstutiH

File name : shriistuti.itx

Category : devii, lakShmI, stotra, vedAnta-deshika, devI

Location : doc_devii

Author : Swami Vedanta Desika (Ramanuja Sampradaya)

Transliterated by : WebD

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com

Description-comments : Also known as kanakadhArAlakShmIstavarAjaH

Latest update : June 4, 2022

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

Please help to maintain respect for volunteer spirit.

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 17, 2024

sanskritdocuments.org

श्रीस्तुतिः

श्रीकनकधारालक्ष्मीस्तवराजः

श्रीगणेशाय नमः ।
श्रीमते रामानुजाय नमः ।
श्रीमान्वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो सन्निधत्तां सदा हृदि ॥

ईशानां जगतोऽस्य वेङ्कटपतेर्विष्णोः पर प्रेयसीं
त्वद्वक्षस्थलनित्यवासरसिकां तत्क्षान्तिसंवर्द्धितीम् ।
पद्मालङ्कृतपाणिपल्लवयुतां पद्मासनस्थां श्रियं
वात्सल्यादिगुणोज्ज्वलां भगवती वन्दे जगन्मातरम् ॥

मानातीतप्रथितविभवां मङ्गलं मङ्गलानां वक्षःपीठं
मधुविजयिनो भूषयन्तीं स्वकान्त्या ।
प्रत्यक्षानुश्रविकमहिमप्रार्थिनीनां प्रजानां
श्रेयोमूर्तिं श्रियमशरणस्त्वां शरण्यां प्रपद्ये ॥ १॥

आविर्भावः कलशजलधावध्वरे वाऽपि यस्याः
स्थानं यस्याः सरसिजवनं विष्णुवक्षःस्थलं वा ।
भूमा यस्या भुवनमखिलं देवि दिव्यं पदं वा
स्तोकप्रज्ञैरनवधिगुणा स्तूयसे सा कथं त्वम् ॥ २॥

स्तोतव्यत्वं दिशति भवती देहिभिः स्तूयमाना
तामेव त्वामनितरगतिः स्तोतुमाशंसमानः ।
सिद्धारम्भः सकलभुवनश्लाघनीयो भवेयं
सेवापेक्षा तव चरणयोः श्रेयसे कस्य न स्यात् ॥ ३॥

यत्सङ्कल्पाद्भवति कमले यत्र देहिन्यमीषां
जन्मस्थेमप्रलयरचना जङ्गमाजङ्गमानाम् ।

तत्कल्याणं किमपि यमिनामेकलक्ष्यं समाधौ
    पूर्णं तेजः स्फुरति भवतीपादलाक्षारसाङ्कम् ॥ ४॥

निष्प्रत्यूहप्रणयघटितं देवि नित्यानपायं विष्णुस्त्वं
    चेत्यनवधिगुणं द्वन्द्वमन्योन्यलक्ष्यम् ।
शेषश्चित्तं विमलमनसां मौलयश्च श्रुतीनां
    सम्पद्यन्ते विहरणविधौ यस्य शय्याविशेषाः ॥ ५॥

उद्देश्यत्वं जननि भजतोरूज्झितोपाधिगन्धं
    प्रत्यग्रूपे हविषि युवयोरेकशेषित्वयोगात् ।
पद्मे पत्युस्तव च निगमैर्नित्यमन्विष्यमाणो
    नावच्छेदं भजति महिमा नर्तयन मानसं नः ॥ ६॥

पश्यन्तीषु श्रुतिषु परितः सूरिवृन्देन सार्धं
    मध्येकृत्य त्रिगुणफलकं निर्मितस्थानभेदम् ।
विश्वाधीशप्रणयिनी सदा विभ्रमद्यूतवृत्तौ
    ब्रह्मेशाद्या दधति युवयोरक्षशारप्रचारम् ॥ ७॥

अस्येशाना त्वमसि जगतः संश्रयन्ती मुकुन्दं
    लक्ष्मीः पद्मा जलधितनया विष्णुपत्नीन्दिरेति ।
यन्नामानि श्रुतिपरिपणान्येवमावर्तयन्तो
    नावर्तन्ते दुरितपवनप्रेरिते जन्मचक्रे ॥ ८॥

त्वामेवाहुः कतिचिदपरे त्वत्प्रियं लोकनाथं
    किं तैरन्तःकलहमलिनैः किञ्चिदुत्तीर्य मग्नैः ।
त्वत्सम्प्रीत्यै विहरति हरौ सम्मुखीनां श्रुतीनां
    भावारूढौ भगवति युवां दम्पती दैवतं नः ॥ ९॥

आपन्नार्तिप्रशमनविधौ बद्धदीक्षस्य
    विष्णोराचख्युस्त्वां प्रियसहचरीमैकमत्योपपन्नाम् ।
प्रादुर्भावैरपि समतनुः प्राध्वमन्वीयसे त्वं
    दूरोत्क्षिप्तैरिव मधुरता दुग्धराशेस्तरङ्गैः ॥ १०॥

धत्ते शोभां हरिमरकते तावकी मूर्तिराद्या
    तन्वी तुंगस्तनभरनता तप्तजाम्बूनदाभा ।
यस्यां गच्छन्त्युदयविलयैर्नित्यमानन्दसिन्धा-
    विच्छावेगोल्लसितलहरीविभ्रमं व्यक्तयस्ते ॥ ११॥

आसंसारं विततमखिलं वाङ्मयं
यद्विभूतिर्यद्भ्रूभङ्गात्कुसुमधनुषः किङ्करो मेरूधन्वा ।
यस्यां नित्यं नयनशतकैरेकलक्ष्यो महेन्द्रः
पद्मे तासां परिणतिरसौ भावलेशैस्त्वदीयैः ॥ १२॥

अग्रे भर्तुः सरसिजमये भद्रपीठे
निषण्णामम्भोराशेरधिगतसुधासम्प्लवादुत्थितां त्वाम् ।
पुष्पासारस्थगितभुवनैः पुष्कलावर्तकाद्यैः
क्लृप्तारम्भाः कनककलशैरभ्यषिञ्चन्गजेन्द्राः ॥ १३॥

आलोक्य त्वाममृतसहजे विष्णुवक्षःस्थलस्थां
शापाक्रान्ताः शरणमगमन्सावरोधाः सुरेन्द्राः ।
लब्ध्वा भूयस्त्रिभुवनमिदं लक्षितं त्वत्कटाक्षैः
सर्वाकारस्थिरसमुदयां सम्पदं निर्विशन्ति ॥ १४॥

आर्तत्राणव्रतिभिरमृतासारनीलाम्बुवाहै-
रम्भोजानामुषसि मिषतामन्तरङ्गैरपाङ्गैः ।
यस्यां यस्यां दिशि विहरते देवि दृष्टिस्त्वदीया
तस्यां तस्यामहमहमिकां तन्वते सम्पदोघाः ॥ १५॥

योगारम्भत्वरितमनसो युष्मदैकान्त्ययुक्तं धर्मं
प्राप्तुं प्रथममिह ये धारयन्तेऽधना याम् ॥

तेषां भूमेर्धनपतिगृहादम्बुधेर्वा प्रकामं धारा
निर्यान्त्यधिकमधिकं वाञ्छितानां वसूनाम् ॥ १६॥

श्रेयस्कामा यमलनिलये चित्रमाम्नायवाचां
चूडापीडं तव पदयुगं चेतसा धारयन्तः ।
छत्रच्छायासुभगशिरसश्चामरस्मेरपार्श्वाः
श्लाघाशब्दश्रवणमुदिताः स्रग्विणः सञ्चरन्ति ॥ १७॥

ऊरीकर्तुं कुशलमखिलं जेतुमादीनरातीन्
दूरीकर्तुं दुरितनिवहं त्यक्तुमाद्यामविद्याम् ।
अम्ब स्तम्बावधिकजननग्रामसीमान्तरेखामालम्बन्ते
विमलमनसो विष्णुकान्ते दया ते ॥ १८॥

जाताकांक्षा जननि युवयोरेकसेवाधिकारे
मायालीढं विभवमखिलं मन्यमानास्तृणाय ।
प्रीत्यै विष्णोस्तव च कृतिनः प्रीतिमन्तो भजन्ते
वेलाभङ्गप्रशमनफलं वैदिकं धर्मसेतुम् ॥ १९॥

सेवे देवि त्रिदशमहिलामौलिमालार्चितं ते
सिद्धिक्षेत्रं शमितविपदां सम्पदां पादपद्मम् ।
यस्मिन्नीषन्नमितशिरसो यापयित्वा शरीरं
वर्तिष्यन्ते वितमसि पदे वासुदेवस्य धन्याः ॥ २०॥

सानुप्रासप्रकटितदयैः सान्द्रवात्सल्यदिग्धैरम्ब
स्निग्धैरमृतलहरीलब्धसब्रह्मचर्यैः ।
घर्मे तापत्रयविरचिते गाढतप्तं क्षणं
मामाकिञ्चन्यग्लपितमनघैराद्रियेथाः कटाक्षैः ॥ २१॥

सम्पद्यन्ते भवभयतमीभानवस्त्वत्प्रसादाद्भावाः
सर्वे भगवति हरौ भक्तिमुद्वेलयन्तः ।
याचे किं त्वामहमिह यतः शीतलोदारशीला
भूयो भूयो दिशसि महतां मङ्गलानां प्रबन्धान् ॥ २२॥

माता देवि त्वमसि भगवान्वासुदेवः पिता मे
जातः सोऽहं जननि युवयोरेकलक्ष्यं दयायाः ।
दत्तो युष्मत्परिजनतया देशिकैरप्यतस्त्वं किं ते
भूयः प्रियमिति किल स्मेरवक्त्रा विभासि ॥ २३॥

कल्याणानामविकलनिधिः काऽपि कारुण्यसीमा
नित्यामोदा निगमवचसां मौलिमन्दारमाला ।
सम्पद्दिव्यः मधुविजयिनः सन्निधत्तां सदा
मे सैषा देवी सकलभुवनप्रार्थनाकामधेनुः ॥ २४॥

उपचितगुरुभक्तेरुत्थितं वेङ्कटेशात्कलि-
कलुषनिवृत्त्यै कल्प्यमानं प्रजानाम् ।
सरसिजनिलयायाः स्तोत्रमेतत्पठन्तः
सकलकुशलसीमा सार्वभौमा भवन्ति ॥ २५॥

कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥

॥ इति श्रीवेदान्तदेशिकविरचिता श्रीस्तुतिः सम्पूर्णा ॥

इति श्रीकविरार्किकसंइहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य
वेदान्ताचार्यस्य कृतिषु कनकधाराश्रीलक्ष्मीस्तवराजः सम्पूर्णः ॥

This is vedAnta deshika's kanaka-dhAra-stavam. lakShmI or shrI is reputedly the Goddess of Wealth. shloka 705 refers to how She can shower wealth on Her votaries.

That apart, the importance of this Stotra lies in the emphasis it lays on the concept of divya-dampatI (Divine Couple). nArAyaNa and shrI together as a Dvandvam (couple) are the ultimate tattva, the most potent upAya or means, and the Goal, or puruShArtha, to be attained. Thus divya-dampatI is the tattva; zaraNya-dampatI is the Hita; and sheShi-dampatI is the puruShArtha. shloka 698 posits this truth that not nArAyaNa by Himself, nor lakShmI by Herself, is to be sought after, but the Two of them together (yuvAM dampatI naH daivataM). As many as seven shlokas out of the 25 refer to the Two of them together (shlokas 694, 695, 696, 698, 705, 708 and 712.) Where earlier AchAryas who sung the praise of lakShmI were inclined to put lakShmI above the Lord or the Lord above lakShmI, deshika studiedly maintains absolute equality among them.

shloka 702, the central shloka in the Stotra, celebrates the coronation of lakShmI in the presence of the Lord. Only thereafter the Devas and their chiefs together with their wives regained the rulership (which they had lost by curse) (703), by being the recipients of lakShmI's katAkShas (glances). All riches and wealth will vie with one another to go and stay where lakSmI-katAkSha goes and settles (704).

The reference to the Lord at the beginning and at the end (690 and 713) as madhuvijayi, a term by which deshika indicates

Lord shrInivAsa in the haMsa sandesha, and the name sarasIjanilaya for lakShmI are pointers to Padmavati Thayar of Tiruchanur (Tirupati) being praised in, and by this Stotra. The opening words "mAnAtIta" meaning "exceeding bounds" will befit only Padmavati Thayar, who alone goes out in procession outside the temple precincts. This stotra, it is said here (714), has emerged out of Guru Bhakti. Without that the supremacy of shrI tattva cannot be visualised.

Proofread by Ravin Bhalekar ravibhalekar at hotmail.com

shrIstutiH by Swami Vedanta Desika

pdf was typeset on August 17, 2024

Please send corrections to *sanskrit@cheerful.com*